# Drig-Drishya-Viveka

## દૃગ્દૃશ્યવિવેકઃ અથવા વાક્યસુધા

## Document Information

Text title : Drig-Drishya-Viveka

File name : drigdrishyaviveka.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Sw. Bharati Tirtha [Sringeri Mathadhipati 1328-1380]

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : A prakarana grantha on Vedanta

Latest update : April 17, 2003, February 26, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# દૃગ્દૃશ્યવિવેકઃ અથવા વાક્યસુધા

ભારતી તીર્થ સ્વામિના વિરચિતઃ

રૂપં દૃશ્યં લોચનં દૃક્ તદ્દૃશ્યં દૃક્તુ માનસમ્ ।
દૃશ્યા ધીવૃત્તયઃ સાક્ષી દૃગેવ ન તુ દૃશ્યતે ॥ ૧॥

નીલપીતસ્થૂલસૂક્ષ્મહ્રસ્વદીર્ઘાદિ ભેદતઃ ।
નાનાવિધાનિ રૂપાણિ પશ્યેલ્લોચનમેકધા ॥ ૨॥

આન્ધ્યમાન્દ્યપટુત્વેષુ નેત્રધર્મેષુ ચૈકધા ।
સઙ્કલ્પયેન્મનઃ શ્રોત્રત્વગાદૌ યોજ્યતામિદમ્ ॥ ૩॥

કામઃ સઙ્કલ્પસન્દેહૌ શ્રદ્ધાઽશ્રદ્ધે ધૃતીતરે ।
હ્રીર્ધીર્ભીરિત્યેવમાદીન્ ભાસયત્યેકધા ચિતિઃ ॥ ૪॥

નોદેતિ નાસ્તમેત્યેષા ન વૃદ્ધિં યાતિ ન ક્ષયમ્ ।
સ્વયં વિભાત્યથાન્યાનિ ભાસયેત્સાધનં વિના ॥ ૫॥

ચિચ્છાયાઽઽવેશતો બુદ્ધૌ ભાનં ધીસ્તુ દ્વિધા સ્થિતા ।
એકાહઙ્કૃતિરન્યા સ્યાદન્તઃકરણરૂપિણી ॥ ૬॥

છાયાઽહઙ્કારયોરૈક્યં તપ્તાયઃપિણ્ડવન્મતમ્ ।
તદહઙ્કારતાદાત્મ્યાદ્દેહશ્ચેતનતામગાત્ ॥ ૭॥

અહઙ્કારસ્ય તાદાત્મ્યં ચિચ્છાયાદેહસાક્ષિભિઃ ।
સહજં કર્મજં ભ્રાન્તિજન્યં ચ ત્રિવિધં ક્રમાત્ ॥ ૮॥

સમ્બન્ધિનોઃ સતોર્નાસ્તિ નિવૃત્તિઃ સહજસ્ય તુ ।
કર્મક્ષયાત્ પ્રબોધાચ્ચ નિવર્તેતે ક્રમાદુભે ॥ ૯॥

અહઙ્કારલયે સુપ્તૌ ભવેદ્દેહોઽપ્યચેતનઃ ।
અહઙ્કારવિકાસાર્ધઃ સ્વપ્નઃ સર્વસ્તુ જાગરઃ ॥ ૧૦॥

અન્તઃકરણવૃત્તિશ્ચ ચિતિચ્છાયૈક્યમાગતા ।

વાસનાઃ કલ્પયેત્ સ્વપ્ને બોધેઽક્ષૈર્વિષયાન્ બહિઃ ॥ ૧૧॥

મનોઽહઙ્કૃત્યુપાદાનં લિઙ્ગમેકં જડાત્મકમ્ ।
અવસ્થાત્રયમન્વેતિ જાયતે મ્રિયતે તથા ॥ ૧૨॥

શક્તિદ્વયં હિ માયાયા વિક્ષેપાવૃતિરૂપકમ્ ।
વિક્ષેપશક્તિર્લિઙ્ગાદિ બ્રહ્માણ્ડાન્તં જગત્ સૃજેત્ ॥ ૧૩॥

સૃષ્ટિર્નામ બ્રહ્મરૂપે સચ્ચિદાનન્દવસ્તુનિ ।
અબ્ધૌ ફેનાદિવત્ સર્વનામરૂપપ્રસારણા ॥ ૧૪॥

અન્તર્દૃગ્દૃશ્યયોર્ભેદં બહિશ્ચ બ્રહ્મસર્ગયોઃ ।
આવૃણોત્યપરા શક્તિઃ સા સંસારસ્ય કારણમ્ ॥ ૧૫॥

સાક્ષિણઃ પુરતો ભાતિ લિઙ્ગં દેહેન સંયુતમ્ ।
ચિતિચ્છાયા સમાવેશાજ્જીવઃ સ્યાદ્વ્યાવહારિકઃ ॥ ૧૬॥

અસ્ય જીવત્વમારોપાત્ સાક્ષિણ્યપ્યવભાસતે ।
આવૃતૌ તુ વિનષ્ટાયાં ભેદે ભાતેઽપયાતિ તત્ ॥ ૧૭॥

તથા સર્ગબ્રહ્મણોશ્ચ ભેદમાવૃત્ય તિષ્ઠતિ ।
યા શક્તિસ્તદ્વશાદ્બ્રહ્મ વિકૃતત્વેન ભાસતે ॥ ૧૮॥

અત્રાપ્યાવૃતિનાશેન વિભાતિ બ્રહ્મસર્ગયોઃ ।
ભેદસ્તયોર્વિકારઃ સ્યાત્ સર્ગે ન બ્રહ્મણિ ક્વચિત્ ॥ ૧૯॥

અસ્તિ ભાતિ પ્રિયં રૂપં નામ ચેત્યંશપઞ્ચકમ્ ।
આદ્યત્રયં બ્રહ્મરૂપં જગદ્રૂપં તતો દ્વયમ્ ॥ ૨૦॥

ખવાય્વગ્નિજલોર્વીષુ દેવતિર્યઙ્નરાદિષુ ।
અભિન્નાઃ સચ્ચિદાનન્દાઃ ભિદ્યેતે રૂપનામની ॥ ૨૧॥

ઉપેક્ષ્ય નામરૂપે દ્વે સચ્ચિદાનન્દતત્પરઃ ।
સમાધિં સર્વદા કુર્યાદ્-હૃદયે વાઽથવા બહિઃ ॥ ૨૨॥

સવિકલ્પો નિર્વિકલ્પઃ સમાધિર્દ્વિવિધો હૃદિ ।
દૃશ્યશબ્દાનુવિદ્ધેન સવિકલ્પઃ પુનર્દ્વિધા ॥ ૨૩॥
(સરસ્વતીરહસ્યોપનિષદે શબ્દાનુભેદેન, શબ્દાનુવેધેન)

કામાદ્યાશ્ચિત્તગા દૃશ્યાસ્તત્સાક્ષિત્વેન ચેતનમ્ ।
ધ્યાયેદૃશ્યાનુવિદ્ધોઽયં સમાધિઃ સવિકલ્પકઃ ॥ ૨૪॥

અસઙ્ગઃ સચ્ચિદાનન્દઃ સ્વપ્રભો દ્વૈતવર્જિતઃ ।
અસ્મીતિ શબ્દવિદ્ધોઽયં સમાધિઃ સવિકલ્પકઃ ॥ ૨૫॥

સ્વાનુભૂતિરસાવેશાદ્દૃશ્યશબ્દાવુપેક્ષ્ય તુ ।
નિર્વિકલ્પઃ સમાધિઃ સ્યાન્નિવાતસ્થિતદીપવત્ ॥ ૨૬॥

હૃદીવ બાહ્યદેશેઽપિ યસ્મિન્ કસ્મિંશ્ચ વસ્તુનિ ।
સમાધિરાદ્યઃ સન્માત્રાન્નામરૂપપૃથક્કૃતિઃ ॥ ૨૭॥

અખણ્ડૈકરસં વસ્તુ સચ્ચિદાનન્દલક્ષણમ્ ।
ઇત્યવિચ્છિન્નચિન્તેયં સમાધિર્મધ્યમો ભવેત્ ॥ ૨૮॥

સ્તબ્ધીભાવો રસાસ્વાદાત્તૃતીયઃ પૂર્વવન્મતઃ ।
એતૈઃ સમાધિભિઃ ષડ્ભિર્નયેત્ કાલં નિરન્તરમ્ ॥ ૨૯॥

દેહાભિમાને ગલિતે વિજ્ઞાતે પરમાત્મનિ ।
યત્ર યત્ર મનો યાતિ તત્ર તત્ર સમાધયઃ ॥ ૩૦॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે ॥ ૩૧॥

અવચ્છિન્નશ્ચિદાભાસસ્તૃતીયઃ સ્વપ્નકલ્પિતઃ ।
વિજ્ઞેયસ્ત્રિવિધો જીવસ્તત્રાદ્યઃ પારમાર્થિકઃ ॥ ૩૨॥

અવચ્છેદઃ કલ્પિતઃ સ્યાદવચ્છેદ્યં તુ વાસ્તવમ્ ।
તસ્મિન્ જીવત્વમારોપાદ્બ્રહ્મત્વં તુ સ્વભાવતઃ ॥ ૩૩॥

અવચ્છિન્નસ્ય જીવસ્ય પૂર્ણેન બ્રહ્મણૈકતામ્ ।
તત્ત્વમસ્યાદિવાક્યાનિ જગુર્નેતરજીવયોઃ ॥ ૩૪॥

બ્રહ્મણ્યવસ્થિતા માયા વિક્ષેપાવૃતિરૂપિણી ।
આવૃત્યાખણ્ડતાં તસ્મિન્ જગજ્જીવૌ પ્રકલ્પયેત્ ॥ ૩૫॥

જીવો ધીસ્થચિદાભાસો ભવેદ્ભોક્તા હિ કર્મકૃત્ ।
ભોગ્યરૂપમિદં સર્વં જગત્ સ્યાદ્ભૂતભૌતિકમ્ ॥ ૩૬॥

અનાદિકાલમારભ્ય મોક્ષાત્ પૂર્વમિદં દ્વયમ્ ।
વ્યવહારે સ્થિતં તસ્માદુભયં વ્યાવહારિકમ્ ॥ ૩૭॥

ચિદાભાસસ્થિતા નિદ્રા વિક્ષેપાવૃતિરૂપિણી ।

આવૃત્ય જીવજગતી પૂર્વે નૂત્ને તુ કલ્પયેત્ ॥ ૩૮॥

પ્રતીતિકાલ એવૈતે સ્થિતત્વાત્ પ્રાતિભાસિકે ।
ન હિ સ્વપ્નપ્રબુદ્ધસ્ય પુનઃ સ્વપ્ને સ્થિતિસ્તયોઃ ॥ ૩૯॥

પ્રાતિભાસિકજીવો યસ્તજ્જગત્ પ્રાતિભાસિકમ્ ।
વાસ્તવં મન્યતેઽન્યસ્તુ મિથ્યેતિ વ્યાવહારિકઃ ॥ ૪૦॥

વ્યાવહારિકજીવો યસ્તજ્જગદ્વ્યાવહારિકમ્ ।
સત્યં પ્રત્યેતિ મિથ્યેતિ મન્યતે પારમાર્થિકઃ ॥ ૪૧॥

પારમાર્થિકજીવસ્તુ બ્રહ્મૈક્યં પારમાર્થિકમ્ ।
પ્રત્યેતિ વીક્ષતે નાન્યદ્વીક્ષતે ત્વનૃતાત્મના ॥ ૪૨॥

માધુર્યદ્રવશૈત્યાનિ નીરધર્માસ્તરઙ્ગકે ।
અનુગમ્યાથ તન્નિષ્ઠે ફેનેઽપ્યનુગતા યથા ॥ ૪૩॥

સાક્ષિસ્થાઃ સચ્ચિદાનન્દાઃ સમ્બન્ધાદ્વ્યાવહારિકે ।
તદ્દ્વારેણાનુગચ્છન્તિ તથૈવ પ્રાતિભાસિકે ॥ ૪૪॥

લયે ફેનસ્ય તદ્ધર્મા દ્રવાદ્યાઃ સ્યુસ્તરઙ્ગકે ।
તસ્યાપિ વિલયે નીરે તિષ્ઠન્ત્યેતે યથા પુરા ॥ ૪૫॥

પ્રાતિભાસિકજીવસ્ય લયે સ્યુર્વ્યાવહારિકે ।
તલ્લયે સચ્ચિદાનન્દાઃ પર્યવસ્યન્તિ સાક્ષિણિ ॥ ૪૬॥

ઇતિ ભારતી તીર્થ સ્વામિના વિરચિતઃ
દૃગ્દૃશ્યવિવેકઃ સમાપ્તઃ ॥

Encoded and proofread by Sunder Hattangadi

*Drig-Drishya-Viveka*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*